# चरक-सुश्रुत-संहितयोः नारी-महत्त्वम्

**वैद्य असितकुमार पांजा**

सहायक-प्रोफेसरः, राष्ट्रियायुर्वेद-संस्थानं, जयपुरम्

Email- asitpanjain@gmail.com ;

**प्रास्ताविकम्**

आयुर्वेद: अथर्ववेदस्य उपवेदोऽस्ति । आयुर्वेद: केवलं चिकित्सा-विज्ञान-मात्रमेव नास्ति, अपि तु मनुष्यस्य स्वस्थरूपेण दीर्घायुष्य-प्राप्त्यर्थम् उपयोगिनां समस्त-सामाजिकार्थिक-सास्कृतिक- बौद्धिक- विषयाणाम् एकं परीक्षणात्मकं विज्ञानं वर्तते। आचार्येण अग्निवेशेन लिखिता तथा च समये समये आचार्येण चरकेण आचार्येण दृढबलेन च प्रतिसंस्कृता तथा परिपूरिता 'चरक-संहिता' तथा आचार्येण वृद्ध-सुश्रुतेन विरचिता आचार्येण सुश्रुतेन संशोधिता तथा आचार्येण नागार्जुनेन प्रतिसंस्कृता " सुश्रुत संहिता " आयुर्वेद वाङ्मयस्य मूलग्रन्थौ स्तः । एतयोः संहितयोः लेखनं १५०० – ९००० ई. पूर्वत: प्रारम्भमभवत् तथा ईस्वीय-चतुर्थपञ्चम-शताब्द्यां पूर्णमभवत् । २००० वर्ष-पर्यन्तं लिखितयोः एतयोः ग्रन्थयोः तत्कालिकीनां सामाजिकार्थिक- सांस्कृतिकीनां सर्वासाम् अनुसंधानपरक- विवेचनानां वैज्ञानिकविधया वर्णनं कृतम् ।अस्मिन् प्रबन्धे एतयोः संहितयोः समुपलब्ध-नारी-विषयक-समस्त-बिन्दूनाम् एकं वैज्ञानिकं विवेचनं करिष्यते । अस्मिन् प्रबन्धे उपर्युक्त-विषयस्य निम्नलिखितयो: द्वयो: शीर्षकयो: विवेचनं प्रस्तोष्यते ।

**[अ]** स्त्रिया: सामान्यं सामाजिकञ्च विवेचनम् ।

**[ब]** स्त्री(कन्या)-संतानोत्पत्तेः, तस्या वृद्धेः, प्रकृतेः, समुत्पन्न-रोगाणाम्, औषध-प्रयोगाणां, प्रसूति-कालीन- क्रियाणां विवेचनम् ।

**विषय-प्रवेशः**

प्रागैतिहासिककालत: स्त्रीणां प्राथमिकी गौणलिङ्गगता च भिन्नता नार्यै अस्मिन् समाजे विशिष्ट-स्थानं प्रददाति। प्राचीनकालादेव नारी स्व-लावण्येन, सुकुमारतया एवं तुलनात्मक-शारिरीक-दुर्बलतया पुरुषात् भिन्न {विशिष्टं} स्थानं प्राप्तवती, तथा समये समये तस्याः पुरुषस्याधीनस्थतायाः, अलंकारस्य तथा इन्द्रिय-तृप्ते: माध्यम-रूपेण वर्णनम् अभवत् ।उत्तरवैदिक-वाङ्मयेऽपि स्त्रीभ्यः क्षेत्रविशेषे शिक्षणं न दातुं विधानं कृतम् । आधुनिक: काल: एव स्त्रीभ्यः समानतारूपि एकं नूतनं स्वरूपं प्रदत्तवान् ।

(अ) स्त्रिया: सामान्यं सामाजिकञ्च विवेचनम् :-

१ जीवन-संगिनीरूपे स्त्रियै समानहृदया वश्या च भवितुमपि विधानं कथितम् । एतत् अपि कथितम् यत् इयं सामाजिकं संतुलनं सुष्ठु स्थापयति ।[1]

२ स्त्री वाजीकरणस्य प्रधान-क्षेत्ररूपेण कथिता तथा स्त्री वंश-परम्परा-रक्षणार्थं कारणरूपापि निर्दिष्टा। अत्र स्त्रिया: महत्त्वं एवं सामाजिकी आवश्यकता प्रदर्शिता।[2]

३ चिकित्सायाः क्षेत्रे पत्या सह तथा सहजनै: सह आगतायाः स्त्रिया: एव चिकित्सां कर्तुं विधानमस्ति ।[3]

४ वैद्याय स्त्रिया प्रदत्तस्य कस्यापि वस्तुन: ग्रहणस्य निषेधः कृतः ।[4]

५ वैद्याय मनसा अपि अन्यस्त्रिया सह संगस्य वर्जनार्थं कठोरमनुशासनं कृतम् ।[5]

६ विशिखानुप्रवेशकाले स्त्रीसंग-वर्जनस्य शिक्षा प्रदत्ता ।[6]

७ दोषै: उत्पन्नेषु सामान्यरोगेषु पित्तदोषजन्य-रोगस्य उपक्रमे स्त्रीसेवा वर्णिता ।[7]

८ स्त्रिया: विषदात्रीरूपे तथा विषकन्यरूपे प्रयोगः कृतः ।[8]

९ भिन्न-भिन्न-ऋतुषु भिन्न-भिन्न-प्रकारेण स्त्रीसंगस्य विधानं वर्णितम् ।[9]

१० स्त्री पुरुष-विनोदस्य माध्यमरूपे कथिता तथा तस्यै विधिवत् शिक्षणं प्रदातुमपि विधानं कृतम् ।[10]

---

[1] हृदयोत्सवरूपा या या समानमनःशया॥ (चरकसंहिता चिकित्सास्थानम् २-१/१०)

[2] वाजीकरणमग्र्यं च क्षेत्रं स्त्री या प्रहर्षिणी॥ इष्टा ह्येकैकशोऽप्यर्था परं प्रीतिकरा स्मृताः।

किं पुनः स्त्रीशरीरे ये सङ्घातेन प्रतिष्ठिताः॥ (सङ्घातो हीन्द्रियार्थानां स्त्रीषु नान्यत्र विद्यते।)

स्त्र्याश्रयो हीन्द्रियार्थो यः स प्रीतिजननोऽधिकम्। स्त्रीषु प्रीतिर्विशेषेण स्त्रीष्वपत्यं प्रतिष्ठितम्॥६॥

(चरकसंहिता चिकित्सास्थानम् २-१/४-६)

[3] तथैवासन्निहितेश्वराणां स्त्रीणामनध्यक्षाणां वा; (चरकसंहिता विमानस्थानम् ८)

[4] न च कदाचित् स्त्रीदत्तमामिषमादातव्यमननुज्ञातं भर्त्राऽथवाऽध्यक्षेण (चरकसंहिता विमानस्थानम् ८/१३)

[5] मनसाऽपि च परस्त्रियो नाभिगमनीयास्तथा सर्वमेव परस्वं (चरकसंहिता विमानस्थानम् ८/१३)

[6] स्त्रीभिः सहास्यां संवासं परिहासं च वर्जयेत् (सुश्रुतसंहिता सूत्रस्थानम्१०)

[7] संयोगश्चेष्टाभिः स्त्रीभिः शीतोपहितांशुकस्रग्धारिणीभिः। (चरकसंहिता विमानस्थानम् ६/१७)

[8] विषैर्निहन्युर्निपुणं नृपतिं दुष्टचेतसः। स्त्रियो वा विविधान् योगान् कदाचित्सुभगेच्छया॥

विषकन्योपयोगाद्वा क्षणाज्जह्यादसून्नरः। (सुश्रुतसंहिता कल्पस्थानम् १/५-६)

[9] शयने प्रमदां पीनां विशालोपचितस्तनीम्॥ आलिङ्ग्यागुरुदिग्धाङ्गीं सुप्यात् समदमन्मथः। ( चरकसंहिता सूत्रस्थानम् ६/१६-१७)

वसन्तेऽनुभवेत् स्त्रीणां काननानां च यौवनम्॥ ( चरकसंहिता सूत्रस्थानम् ६/२६)

[10] रूपयौवनमत्ताभिः शिक्षिताभिर्विशेषतः। वस्त्राभरणमाल्यैश्च भूषिताभिर्यथर्तुकैः॥

**[ब]** स्त्री(कन्या)-संतानोत्पत्तेः, तस्या वृद्धेः, प्रकृतेः, समुत्पन्न-रोगाणाम्, औषध-प्रयोगाणां, प्रसूति-कालीन- क्रियाणां विवेचनम् ।

१ महर्षय: विविधानि परीक्षणानि निरीक्षणानि च कृत्वा स्त्रीपुरुषयो: प्रकृतिगत-वृद्धि-क्षययोः भिन्नतां प्रतिपादितवन्तः।[11] स्त्रियाः शारीरिकी एवं मानसिकी वृद्धिः एवं पूर्णता शीघ्रभाविनी कथिता ।

२ शरीरस्य रचनात्मक-क्रियात्मक-विभिन्नतायाः कारणेन केचिद् रोगाः विशेषरूपेण स्त्रियां भवन्ति । आचार्या: एतेषां विशेष-रोगाणां कारणरूपे परतन्त्रताया: अवैशारद्यतायाः लज्जाशीलताया: सुकुमारताया: च निर्देशः कृतः ।[12]

३ आचार्य: सुश्रुत: चिकित्साया: दृष्ट्या स्त्रियः पुरुषाणाम् अपेक्षया स्वल्पसहनशीलाः वर्णितवान् । अपि च तासां सुकुमारतानुसारेण ताभ्यः विशेषमात्रा प्रदातुं विधानं कृतवान् ।[13],[14]

४ स्त्रियाः सुकुमारतां रोगस्य साध्यासाध्यताया: विचारयितुं मापदण्ड: प्रदर्शितः ।[15]

५ अनया दृष्ट्या स्त्री –प्रसूति-विज्ञानरूपिण्याः एक-शाखाया: स्वतन्त्रं विधानं कृतम् ।[16]

६ रजस्वलावस्थायां जरावस्थायाञ्च ग्राम्यधर्म- (मैथुन-) त्यागस्य विधानं नारी-शरीरस्य रक्षां प्रदर्शयति ।[17]

७ गर्भाधानात् प्राक् संकल्पावस्थायां स्त्रीणां विशेष परिचर्याया: विधानं सामाजिक-समानतां सूचयति ।[18]

---

शौचानुरागयुक्ताभिः प्रमदाभिरितस्ततः। संवाह्यमान इष्टाभिः पिबेन्मद्यमनुत्तमम्॥ (चरकसंहिता चिकित्सास्थानम् २४/१६-१७)

[11] पञ्चविंशे ततो वर्षे पुमान् नारी तु षोडशे॥ समत्वागतवीर्यौ तौ जानीयात् कुशलो भिषक्॥ (सुश्रुतसंहिता सूत्रस्थानम् ३५/१३); तद्वर्षाद्द्वादशात् काले वर्तमानमसृक् पुनः॥ जरापक्वशरीराणां याति पञ्चाशतः क्षयम्॥(सुश्रुतसंहिता शारीरस्थानम् ३/११)

[12] अ.मिथ्याचारेण ताः स्त्रीणां प्रदुष्टेनार्तवेन च।जायन्ते बीजदोषाच्च दैवाच्च शृणु ताः पृथक्॥(चरकसंहिता चिकित्सास्थानम् ३०/८)
ब. शोणितगुल्मस्तु खलु स्त्रिया एव भवति न पुरुषस्य, गर्भकोष्ठार्तवागमनवैशेष्यात्। पारतन्त्र्यादवैशारद्यात् सततमुपचारानुरोधाद्वा वेगानुदीर्णानुपरुन्धत्या आमगर्भे वाऽप्यचिरपतितेऽथवाऽप्यचिरप्रजाताया ऋतौ वा वातप्रकोपणान्यासेवमानायाः क्षिप्रं वातः प्रकोपमापद्यते॥(चरकसंहिता निदानस्थानम् ३/१३)

[13] नृपाणां तत्समानानां तथा सुमहतामपि॥ नारीणां सुकुमाराणां शिशुस्थविरयोरपि॥(सुश्रुतसंहिता चिकित्सास्थानम् ३८/९६)

[14] एतच्चैव कारणमपेक्षमाणा हीनबलमातुरमविषादकरैर्मृदुसुकुमारप्रायैरुत्तरोत्तरगुरुभिरविभ्रमैरनात्ययिकै-श्चोपचरन्त्यौषधैः; विशेषतश्च नारीः, ता ह्यनवस्थितमृदुविवृतविक्लवहृदयाः प्रायः सुकुमार्योऽबलाः परसंस्तभ्याश्च। तथा बलवति बलवद्व्याधिपरिगते स्वल्पबलमौषधमपरीक्षकप्रयुक्तमसाधकमेव भवति।(डल्हणः)

[15] पुंसो - न स्त्रियाः । पुंग्रहणं स्त्रीनिवृत्त्यर्थम् । यतस्तस्याः सर्वदा भीरुत्वमबुद्धिमत्त्वं च, अतो यथोक्तानुरूपगुणाभावः । सा तु यस्मात्तीक्ष्णोष्णौषधानि न सहते, सौकुमार्यादियोगात् । (अरुणदत्तः)

[16] आयुर्वेद-का वैज्ञानिक इतिहास ; आचार्य-प्रियव्रत-शर्मा, पृष्ठा ५२८-५३२

[17] तथाऽतिब्रह्मचारिणीं चिरोत्सृष्टां रजस्वलां दीर्घरोमां कर्कशरोमां सङ्कीर्णरोमां निगूढरोमामल्पद्वारां महाद्वारामप्रियामकामामचौक्षसलिलप्रक्षालितयोनिमप्रक्षालितयोनिं योनिरोगोपसृष्टां स्वभावतो वा दुष्टयोनिं वियोनिं वा..(सुश्रतसंहिता निदानस्थानम् १२/७)

८ प्रसूति-कालस्य स्थितिं पश्यता क्रोधायास- मैथुनादीनां निषेधः कृतः ।[19]

९ स्त्रीणां विशेष-रचनात्मक-क्रियात्मक-भिन्नतां ध्यात्वा प्रसूति-काले अपतर्पणस्य निषेधः कृतः ।[20]

आयुर्वेद -वाङ्मये स्त्री-सम्बन्धिनः केचन-विषयाः तत्कालस्य सामाजिक व्यवस्थायाः कारणात् तथा सामाजिक-परिबद्धतायाः कारणात् गुम्फिताः कृताः तथा केषाञ्चन विस्ताररूपेण वर्णनं नैव कृतम् ---

१ गर्भकालीन- पुंसवन-क्रिया (या गर्भ-संतानं पुंभाव-युक्तं कर्तुं क्रियते) तस्याः समानान्तर-स्त्रीसवन-क्रिया नैवोपलक्षिता भवति।

२ अष्टाङ्गायुर्वेदे पुरुषाय वाजीकरण-सदृशस्य स्त्रियै वाजीकरनौषधि-योगस्य व्यवहारः न दृश्यते ।

३ संहिताकालीने आयुर्वेद-वाङ्मये उच्चकोट्याः स्त्री-वैद्यायाः नामोल्लेखनस्य अभावः अपि समाजे स्त्रीणाम् अल्प-महत्त्वं प्रदर्शयति ।

**उपसंहारः** -

उपर्युक्त-विवेचनेन इदं स्पष्टं भवति यत् आयुर्वेद-वाङ्मये पुरुषैः सह स्त्रीणामपि विशेष-रूपेण वर्णनं कृतम्। इदं समुचितमेव वर्तते यत् सांसारिक-यात्रां प्रचालयितुं स्त्री-पुरुषयोः द्वयोः एव स्वास्थ्यं परमावश्यकम् अस्ति । अत एव स्वास्थ्य-दृष्ट्या द्वयोः भिन्न-भिन्न-प्रकृत्यनुसारं रोगाणां निर्धारणम्, औषधानां चयनं, मात्रायाः निर्धारणञ्च कृतमिति शम् ।

---

[18] अथाप्येतौ स्त्रीपुंसौ स्नेहस्वेदाभ्यामुपपाद्य, वमनविरेचनाभ्यां संशोध्य, क्रमेण प्रकृतिमापादयेत्। संशुद्धौ चास्थापनानुवासना-भ्यामुपाचरेत्; उपाचरेच्च मधुरौषधसंस्कृताभ्यां घृतक्षीराभ्यां पुरुषं, स्त्रियं तु तैलमाषाभ्याम्॥ (चरकसंहिता शारीरस्थानम् ८/४)

[19] प्रायशश्चैनां प्रभूतेनोष्णोदकेन परिषिञ्चेत्, क्रोधायासमैथुनादींश्च परिहरेत्॥ (सुश्रुतसंहिता शारीरस्थानम् १०/१८)

[20] मिथ्याचारात् सूतिकाया यो व्याधिरुपजायते॥ स कृच्छ्रसाध्योऽसाध्यो वा भवेदत्यपतर्पणात्॥ (सुश्रुतसंहिता शारीरस्थानम् १०/१९)